Cochin Samskrit Series No. 1.

VEDĀNTAPARIBHĀṢĀSAṄGRAHA

By

Jñānavidyābhūṣaṇa

HIS HIGHNESS

Raja Sir Sri RAMA VARMA G. C. S. I., G. C. I. E.,

Maharaja of Cochin

EDITOR—**K. Narayana Pisharoti,** M. A.

गोश्रीसंस्कृतग्रन्थावलिः अङ्कः. १.

॥ श्रीः ॥

॥ वेदान्तपरिभाषासंग्रहः ॥

महामहिमश्री—ज्ञानविद्याभूषण

सर् रामवर्म जि सि एस् ऐ, जि सि ऐ ई

गोश्रीमहाराजैः प्रणीतः

प्रसाधकः

के. नारायणपिषारकः

संस्कृतमहापाठशालासमित्या प्रकाशितः

पूर्णत्रयी

मूल्यम्] १९३७ [आणकषट्कम्

श्रीबालमनोरमामुद्रणालये मुद्रितः ।

Cochin Samskrit Series No. 1.

VEDĀNTAPARIBHĀṢĀSAṄGRAHA

By

Jñānavidyābhūṣaṇa

HIS HIGHNESS

Raja Sir Sri Rama Varma G. C. S. I., G. C. I. E.

Maharaja of Cochin

WITH A FOREWORD BY

Rao Sahib I. N. Menon M. A.(Mad.), B. Litt.(Oxon),

Director of Public Instruction, Cochin State

AND WITH BHŪMIKĀ BY

Mahamahopadhyaya S. Ananta Krishna Sastry,

Professor of Vedanta, Calcutta University

EDITED BY

K. Narayana Pisharoti M. A.,

Principal, Samskrit College and Curator,
Maharaja's Grantha Library, Trippunithura

PUBLISHED BY THE SAMSKRIT COLLEGE COMMITTEE
TRIPPUNITHURA

Price] 1937 **[As. 6.**

PRINTED AT THE SRI BALAMANORAMA PRESS,
MYLAPORE, MADRAS.

Dedicated

By Kind Permission

To

His Highness

Sir Sri Rama Varma, G. C. I. E.

Maharaja of Cochin.

FOREWORD.

अशक्यं सदसद्वेति विवेक्तुं वस्तु किंचन ।
यदि स्यात्सिद्धिदं नृणां तद् भूयान्मङ्गलाय नः ॥

'*Vedānta*' is perhaps the most familiar word in the Hindu philosophic terminology both to the indigenous and to the foreign student of Indian culture. In fact, to the layman '*Vedānta*' has come to be almost synonymous with philosophy; and, I think even erudite critical tradition will admit that the Vedānta in one form or another marks the highest attainment of Hindu philosophic thought.

This general concensus of opinion, however, is not supported by a uniform interpretation of the central doctrines of Vedānta; in fact, one is led to wonder whether it is not precisely this variety of ways in which Vedānta has been interpreted that has led all schools of Vedāntins to extol it as the highest philosophy. A study of Vedāntic doctrine is, therefore, not for the novice who has had no training in the technique and terminology of Hindu philosophic tradition. While I do not think that it is quite correct to say that the Vedānta can be appreciated only after the antecedent study of the Nyāya or Vaiśeṣika system, there is considerable force in the view that without a clear understanding of the logical, epistemological, psychological and metaphysical ideas with which Vedānta works, the central doctrines will be nearly incomprehensible. But, for a study of these ideas one is not bound to go to the Nyāya-Vaiśeṣika Darśanas. The Vedānta itself has its own explanatory handbooks—philosophical introductions which are specially devoted to the study of the central concepts of Vedānta. The Vedāntaparibhāṣā is

one such introduction, and this Saṅgraha of the Paribhāṣā has collected into sufficiently brief compass the detailed discussions. This Saṅgraha is a summary; but, it is a summary which has kept its eye steadily on the logical sequence and evolution of topics with a keen sense of values, and is marked by a precision, simplicity and grace of diction which is of the utmost importance in the discussion of philosophic problems. Not being a Sanskrit scholar, my opinion on this head can be of little value; but the fact that even a beginner like me is able to read it with profit is certainly not without significance.

I am aware I have been invited to contribute this foreword, not because I am considered proficient in the subject-matter of this book, but because both by natural and by prescriptive right I have had the privilege of being most intimately associated with the author of this work. While I have this advantage, it makes it difficult for me to write or speak with the moderation and impartiality which is expected of one who undertakes to introduce a book to the public. Perhaps, only one fact needs mention to prove the importance of this little book. It was written not by a professional author nor by a recluse; it was written by a man who lived and worked for the welfare of his people and who valued earthly duty as highly as philosophic or spiritual detachment. I may perhaps best quote an incident which was narrated to me by a personal friend of my father and my own. I think it was early in 1917 that His Highness presided over the All-India Āyurvedic Conference at Poona when he was the guest of the late Lokamānya B. G. Tilak. Mr. Tilak told my friend after His Highness had left Poona that his notion of Indian Princedom had undergone a revolutionary change. Observed Mr. Tilak, 'I had heard that His Highness was a scholar among the Princes; but, it is only now that I know that he is a Prince among scholars.'

His Highness's study of Vedānta was not a mere theoretical exercise. His life bore the unmistakable impress of the central teaching of Vedānta. My early memories picture him only as a stern and impartial ruler ; but, the picture that is indelibly impressed on my adult imagination is the picture of a sage mellowed with love and achievement, not indifferent to the ties and to the joys of life, but never a slave to any of its incitements. He was of this earth but not earthly. I must speak with extreme caution and reserve and subject to correction ; but, I think my father's Vedānta was of the concrete rather than the abstract type. I will explain. The evolution of Vedāntic doctrine from the Upaniṣads through the Brahmasūtras to the later commentaries brings to light two alternative intellectual tendencies—the one with its earnest practical or moral pre-occupation with the well-being of the soul, and elaborating a theory of the universe as an explanation of what it has learned to be true, good and beautiful ; the other with its emphasis mainly on theoretical consistency and logical completeness and willing to surrender all the eternal values of life at the altar of abstract Reason. The earlier Upaniṣads represent the first trend of reflection with its earnest practical bias. For instance, the central problem of the Upaniṣads is the nature and destiny of Ātman, and all philosophical speculation and interest centre round the solution of this problem. The urgent question for them, for instance, is not the origin or nature of *Avidyā* (or *Māyā*), but how to get rid of it and restore Ātman to a perception of its identity with Brahman. Hence the Śruti :—

कुतो जातेयमिति ते द्विज माऽस्तु विचारणा ।
इमां कथमहं हन्मीत्येषा तेऽस्तु विचारणा ॥

Of course, I do not for a moment try to maintain that the two issues can be considered in isolation. Unless we

know the cause and nature of *Avidyā*, how can we hope to get rid of it ? What I mean to say is that the main emphasis is on the practical aspect of Vedānta rather than on its theoretical side. The aspect of Vedānta which appealed most to my revered father was the ethical. It seems to me that in the breaking dawn of reflection upon the mysteries of the universe and our own place in it, our ancients were occupied with a problem pre-eminently practical and human, namely, the determination of the destiny of man in his career through time and his status in the order of creation. The Upaniṣads—the original Vedānta—maintained the eternity of Brahman and the identity of Ātman and Brahman; but, they had very little to say on the question why this identity was hidden behind the veil. There was thus a gap, and Śaṅkarācārya and the later Advaitins turned their attention to fill up this and other logical gaps in the Vedāntic doctrine. Māyā as pure illusion is certainly not part of the original Vedānta, and my father certainly was opposed to this extreme nihilism which abandoned as illusory the entire world of space and time with the glories of culture and science and the triumphs of modern civilisation. The following extract from His Highness's illuminating Address to the All-India Philosophical Congress, I think, puts in a nutshell his real conviction:—'The teaching of Hindu Philosophy—of even popular philosophy—is unequivocal. No doubt, *Sruti* says:—

ज्ञानेनैव हि संसारविनाशो नैव कर्मणा ।

but *Jñanā* itself cannot be obtained by a premature renouncing of the world with all its claims on you unfulfilled. The meaning of *Karma-yoga* is the consecration of life to the service of God and man ; and he who tries to be a Sannyāsin without performing his earthly duties builds without foundation. The Hindu ideal of renunciation is not negative, but positive. It demands the complete

and faithful fulfilment of one's duties before one can be fit for *Jñāna* and *Mokṣa.*' The Vedānta which informed and inspired his life and work is marked by a virile quality which one associates invariably with a man who has done his best for the world, who had seen the best and the worst that life can bring in its train and who remained true to his ideals undaunted by reverses and unpolluted by earthly ambitions.

I think His Highness has placed future students of Vedānta under a heavy debt by his acute and severely clear statement of the central themes of Vedāntic speculation. I am no judge on this issue, and I would conclude by commending this little book to the earnest and reverent attention of all those who are still able to take an interest in things of the spirit.

TEMPLE VIEW,
Museum Road, Trichur.
11th October, 1937.

I. N. MENON.

॥ श्रीरस्तु ॥

॥ भूमिका ॥

वेदान्तपरिभाषासंग्रहाख्योऽयं निबन्धः पण्डितकुलोत्तमणिश्रीगो-श्रीमहाराजर्षि-श्रीरामवर्ममहोदयानामतिसरलया भाषयाऽतिगभीराणामपि भावानां वेदान्तपरिभाषागतानां प्रसन्नगभीरया शैल्या च संगृह्णानो वेदान्तपरिभाषाध्येतॄणां तदध्यापकानां च निरतिशयमुपकारमाधास्यति ॥

परिभाषाविद्यार्थिनो जन्याजन्यभेदेन प्रमाभेदम्, तत्रापि वृत्तिजन्य-तयैव प्रमाजन्यता, अखण्डाकारवृत्तिस्थले च वृत्तेरेव प्रमात्वम्, न तु वृत्त्यवच्छिन्नचैतन्यस्येति वेदान्तिनां प्रक्रियाभेदमनेन निबन्धेन यथा शक्नुवन्ति विज्ञातुम्, न तथाऽन्येन निबन्धेन । अयं चार्थः—वृत्त्य-वच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चाभेदं ज्ञानप्रत्यक्षत्वप्रयोजकं संगृह्णन्तो निबन्धकाराः—'इन्द्रियसन्निकर्षादिजन्यान्तःकरणवृत्तिस्तु ज्ञा-नाभिव्यञ्जकत्वात् प्रमेत्युपचर्यते' इति वृत्तेरेव प्रमात्वोपचारमपि यतः समर्थयन्ति, ततो विशदीभवति—'ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वो-पचारः' इति । ज्ञानत्वोपचारस्य प्रमात्वोपचारपर्यन्तं तात्पर्योन्नयनं कस्य वा विदुषो नानन्दयिष्यति ? ज्ञानावच्छेदकत्वं हि यदि चैतन्यगतावरण-विरोधित्वं विवक्ष्यते, तर्हि तदभिव्यञ्जकत्व एव तत्पर्यवस्यति, इति कथं नाखण्डाकारवृत्तिमात्रमपि न प्रमा भविष्यति ? अत्र 'तस्याश्च जन्यत्वात् तत्करणत्वेन चक्षुरादेः प्रमाणत्वम्' इत्यादिपदेनागमानुपलब्ध्योरपि ग्रहणात् प्रत्यक्षत्वे इन्द्रियजन्यत्वं न प्रयोजकमिति सूचनेन मनइन्द्रियत्वानिन्द्रियत्व-विचारो निष्प्रयोजनः, परिभाषायां मनइन्द्रियत्वनिरासस्तु केवलं मता-न्तरनिरासार्थ एव, न तु स्वमतसमर्थनार्थः ; शाब्दप्रत्यक्षसमर्थनेनैव प्रत्य-क्षैन्द्रियिकत्वनियमनिरासात् । मनइन्द्रियत्वनिरासो हि परिभाषाकाराणा-महंप्रत्यये मनसोऽपि प्रत्यक्षतया भाननिर्वाहार्थमेव । तच्च साक्षिप्रत्यक्ष-

त्वस्य मनसि मनइन्द्रियत्ववादिनां श्रीवाचस्पतिमिश्राणामिव विवरणाचार्याणामपि मते इन्द्रियत्वेऽपि मनसः— 'अहं काणः' इत्यादौ चक्षुरादेरिव निर्वहतीति व्यर्थोऽयं मनइन्द्रियत्वनिरासाग्रहः । सर्वथा तु— वेदान्तपरिभाषाकाराः प्रायेण विवरणपक्षमेव समाद्रियन्ते । मनइन्द्रियत्वनिरासोऽपि परिभाषासंग्रहे न परित्यक्तः; अवसरान्तरे— 'प्रत्यक्षं पुनर्द्विविधम्—इन्द्रियजन्यं तदजन्यं चेति । तत्राद्यं चक्षुरादीन्द्रियभेदात् पञ्चविधम् । द्वितीयं सुखादिप्रत्यक्षम्' इति सोऽपि संगृहीतः । अत्र सुखादीत्यादिपदेनाखण्डब्रह्मणोऽपि ग्रहणात् शाब्दापरोक्षोऽपि संगृह्यते । सति चैवम्—परिभाषाकाराः शाब्दापरोक्षवादादिपक्षपातिनोऽपि प्रत्यक्षपरिच्छेदे ऐन्द्रियिकप्रत्यक्षमेव विशिष्य प्रतिपादयन्ति, शाब्दापरोक्षादिकं त्वनुषङ्गत एव सूचयन्ति, इति—'तत्तदिन्द्रिययोग्यवर्तमाने'ति प्रत्यक्षलक्षणे इन्द्रियशब्दघटनापि न दोषाय ॥

अयं भावः—प्रत्यक्षं द्विविधं जन्यमजन्यं च । जन्यं द्विविधम्— इन्द्रियजन्यमनिन्द्रियजन्यं च । उभयं द्विविधं—सविकल्पकं निर्विकल्पकं च । अजन्यं द्विविधं— शुद्धचैतन्यं साक्षिचैतन्यं च । साक्षिचैतन्यं द्विविधम्— जीवसाक्षि ईश्वरसाक्षीति । तत्र साक्षिभास्यानामपि वृत्तिभास्यत्वं वर्तत इत्येकं मतम् । तन्न वर्तत इत्यपरं मतम् । तत्र प्रथममते साक्षिप्रत्यक्षत्वं साक्षिमात्रस्य, न विषयांशे तस्य प्रत्यक्षत्वम् । विषयांशे प्रत्यक्षत्वं तु वृत्तिप्रत्यक्षत्वमादायैव, इति सूचनार्थमेव वृत्तिस्वरूपविवेचनानन्तरमेव — 'ज्ञाने विषये च प्रत्यक्षत्वव्यवहारोऽस्ति' इति संग्रहकारा वदन्ति ; यतः परिभाषाकाराः—साक्षिभास्यानामपि वृत्तिभास्यत्वमिति पक्षमेव समाद्रियन्ते ॥

इदमत्रालोचनीयम्—प्रत्यक्षादिप्रमाणपरिच्छेदानां वेदान्तमते कथमुपयोगः ? कथं च प्रत्यक्षप्रमाणपरिच्छेदेऽनिर्वचनीयख्यातिसमर्थनेन भ्रमप्रत्यक्षसमर्थनमुपपद्यते ? इति । वयं तु प्रतीमः—विषयपरिच्छेदेन प्रथमद्वितीयाध्यायार्थः, तृतीयचतुर्थाध्यायार्थः प्रयोजनपरिच्छेदेन च वेदान्तसारादिप्रकरणग्रन्थ इव यदि संगृह्यते, तर्हि तेनैव सर्वापि ब्रह्ममीमांसा संगृहीतप्राया, इति प्रमाणपरिच्छेदानां सर्वेषामद्वैतसिद्धेर्द्वैत-

मिथ्यात्वसिद्धिपूर्वकत्वात् उपोद्घातसंगत्या ब्रह्ममीमांसोपयोग्यध्यास-भाष्याशयसंग्रहणेन पर्यवसानमिति । सति चैवं प्रपञ्चमिथ्यात्वानु-मानोपयोगिदृष्टान्तशुक्तिरूप्यादिसमर्थनं प्रत्यक्षपरिच्छेदेन, प्रपञ्चमिथ्यात्वं अनुमानपरिच्छेदेन, तदेव सदसद्विलक्षणत्वरूपमुपमानपरिच्छेदेन, व्यतिरेकविधयार्थापत्तिविधयाऽपि तदेवार्थापत्तिपरिच्छेदेन, तदेव विशदं ब्रह्मस्वरूपेण साकमागमपरिच्छेदेन, अनुपलब्धिपरिच्छेदेन तु शुक्तिरूप्यादिबाधप्रत्यक्षनिरूपणेन विशदीक्रियत इति कस्य वेदं सर्वं परोक्षम् ? कथमन्यथा 'भ्रमस्यापि लक्ष्यत्वान्नातिव्याप्तिः' इत्यादिपरिभाषातत्संग्रहयोरुपपत्तिः ? अर्थापत्तिप्रमाणस्य दृष्टश्रुतार्थापत्तिभेदेन विभाग-प्रयोजनं तु दृष्टार्थापत्तिविषयः कथंचन व्यतिरेक्यनुमानेनापि निर्वहति, श्रुतार्थापत्तिविषयस्तु न तेन निर्वहतीति नियतमर्थापत्तिः प्रमाणान्तरं स्वीकर्तव्यमिति सूचनमेव । अत एव—अर्थाध्याहारपक्षात् शब्दाध्याहारपक्षस्यैव योग्यत्वमपि परिभाषायां समर्थितमुपपद्यते ॥

भ्रमस्थलेऽनिर्वचनीयख्यातिसमर्थनं तूलाविद्याकार्यत्वपक्षेणैव, न तु मूलाविद्याकार्यत्वपक्षेण । अत एव—"इदमाकारा चाकचक्याद्याकारा चान्तःकरणवृत्तिरुदेति । तस्यां वृत्ताविदमंशावच्छिन्नं चैतन्यं प्रतिबिम्बति । उपाधीनामुक्तरीत्या तत्रैकदेशस्थत्वेन तदुपहितानामैक्यं भवति । 'इत्थं चे'दमंशावच्छिन्नचैतन्याश्रिता शुक्तित्वप्रकारिकाविद्या रजताकारेण रजतज्ञानाभासाकारेण च परिणमते" इति ग्रन्थे 'इत्थं च' इति निर्देश उपपद्यते । अनेन हि प्रमातृचैतन्याश्रिता तूलाविद्या कथमिदमंशावच्छेदेन रजताकारेण परिणमते इति शङ्कैव परिह्रियते ; यतः इदमवच्छिन्नचैतन्यं प्रमातृचैतन्यं चैकम् , तत एव तूलाविद्येदमवच्छिन्नचैतन्याश्रिताऽपीति ज्ञाप्यत इति । विवरणमते हि तूलाविद्या प्रमातृचैतन्याश्रिता, मूलाविद्या तु शुद्धचैतन्याश्रिता इति विषयविवेकोऽप्यनेन ज्ञाप्यते ॥

वेदान्तपरिभाषा हि प्रायेण सिद्धान्तलेशसंग्रहमेवानुकरोति । इयान् विशेषः—यत् सिद्धान्तलेशसंग्रहकाराः श्रीभामतीप्रस्थानपक्षपातिनः, परिभाषाकारास्तु विवरणप्रस्थानपक्षपातिनः, इति सिद्धान्तं सूचयितुमेव परिभाषासंग्रहकाराः 'धारास्थले तत्तत्क्षणानां विषयत्वात्, स्वविरोधिवृ-

न्युत्पत्तिपर्यन्तं घटादिविषयकैकवृत्तेरेव स्वीकारात्, वृत्तिभेदेऽपि द्वितीयादिवृत्तेरलक्ष्यत्वाभ्युपगमाद्वा नाव्याप्तिः' इति ग्रन्थे 'वृत्तिभेदेऽपि' इति तृतीयं पक्षं परिभाषाकारासंगृहीतमपि संगृह्णन्ति ॥

इदमत्रातिनिगूढं तत्त्वम्—यत् 'अविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च' इति व्यवहारदशायामेव प्रमाणानां प्रमाणत्वम्, ब्रह्मसाक्षात्कारदशायां तदनन्तरं वा तु न प्रमाणत्वम् । अत एव वृत्तेरखण्डाकाराया अपि गौणमेव प्रमात्वम् । तथा च—तत्त्वमस्यादिवाक्यानामभेदेऽपि गौणं संसर्गत्वमूरीकृत्यैव प्रमाणत्वव्यपदेशः । सति चैवम्—आगमादिलक्षणे संसर्गबोधकत्वविशेषणम्,

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।
उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ॥

इति संसर्गाविषयकत्वेनाखण्डार्थत्वव्यवस्थापनं च न विरुद्धमिति सूचनार्थमेव—'सजातीयप्रमाणान्तराबाधिततात्पर्यविषयपदार्थसंसर्गबोधकवाक्यं प्रमाणशब्दः' इति संग्रहकाराः संसर्गघटितं वाक्यलक्षणं निर्ब्रुवन्ति । अथवा—पदार्थश्च संसर्गश्चेति द्वन्द्वसमासाश्रयणेन तात्पर्यविषयपदार्थ-संसर्गान्यतरबोधकवाक्यं प्रमाणशब्द इति योजनाऽनुसन्धेया । सर्वथा तु वेदान्तपरिभाषायामापाततः प्रतीयमानानां विरोधानां न वस्तुगत्या विरोधत्वमिति सूचनेन संग्रहकारा बहूपकुर्वन्ति विद्यार्थिगणानां वेदान्तपरिभाषाविमर्शकानां वा ॥

अन्ते पुनरिदं निवेदयामः — सव्याख्यवेदान्तपरिभाषाध्ययनेन वत्सरद्वयसाध्यं प्रयोजनमेकेन मासेन वेदान्तपरिभाषासंग्रहस्याध्ययनेन स्यादिति सुदृढं विश्वसिमः—यत् संग्रहोऽयं वेदान्तपरिभाषाया न केवलं वेदान्तपरिभाषाविद्यार्थिभिः, न वा तद्विमर्शकैः, किन्तु तदध्यापकैरपि सादरमेव संगृह्येतेति ॥

इति सुधीजनविधेयः

७–१२–३७. अनन्तकृष्णशास्त्री

कलकताविश्वविद्यालयः । महामहोपाध्यायः.

Editor's Note.

On behalf of the Samskrit College and Grantha Library Committee, I have great pleasure in bringing out the first number of the *Cochin Samskrit Series.*

There is undoubtedly a certain appropriateness in starting the *Cochin Samskrit Series* with the *Vedāntaparibhāṣāsaṅgraha.* For, apart from the fact that this treats of Vedānta which is one of the finest flowers of the Indian speculative genius, this work is written by Jñānavidyābhūṣaṇa His Highness Raja Sir Sri Rama Varma, G. C. S. I., G. C. I. E., Maharaja of Cochin from 1071 to 1090 M.E. His Highness was the greatest Śāstraic scholar of the day ; the Samskrit College and the Grantha Library at Trippunithura owe their existence to His Highness's great solicitude for the conservation of the indigenous type of Śāstraic scholarship; and to His Highness must be traced the beginnings of the renaissance of Samskrit learning which the State has been witnessing for the last fifty years and which has made the state, or more correctly Trippunithura, the centre of *Navīnanyāya* studies in South India. In inaugurating the *Cochin Samskrit Series,* therefore, with the Vedāntaparibhāṣāsaṅgraha, we are paying our most loyal and respectful homage to that prince among scholars and scholar among princes.

An appreciation of the text and an exposition of the value of the study of the Vedānta have been dealt with in the *Bhūmikā* and *Foreword* respectively by Mahāmahopādhyāya S. Anantakrishna Sastry of the Calcutta University and by M. R. Ry. Rao Sahib I. N. Menon, Avl., M. A. (Mad.), B. Litt. (Oxon), Director of Public Instruction,

Cochin State, who are both very competent exponents of the subject. We need only say here that this work is bound to prove a very valuable handbook for the study of that most fascinating branch of Indian achievements, namely, Vedānta.

We feel we shall be failing in our duty if we do not take this opportunity to convey our heartfelt gratitude to the Government of His Highness the Maharaja of Cochin for granting permission to start the *Cochin Samskrit Series* and for financing its publications; to His Highness Rama Varma Parikṣit Thampuran, B. A., for placing the Manuscript of the work at our disposal and for giving us valuable advice in preparing the text for the press; to Mahāmahopādhyāya Anantakrishna Sastry for his instructive *Bhūmikā* and to Mr. I. N. Menon for his illuminating *Foreword*, the latter of whom has always been taking a great interest in the progress of the Samskrit College and the development of Samskrit learning in the State. We also tender our thanks to M.R.Ry. C. Sankara Rama Sastry, M.A., B.L., of the Sri Balamanorama Press, Mylapore, Madras, for the neat printing and get-up of the book.

In conclusion it is as much a piece of duty as it is of pleasure to acknowledge and express here our most loyal and respectful sense of indebtedness to His Highness Sir Sri Rama Varma, G.C.I.E., Maharaja of Cochin, not merely for the keen personal interest His Highness has always been taking in the promotion of Samskrit learning in the State, but also for the gracious kindness with which he has been pleased to accord us permission to dedicate this work to His Highness.

Samskrit College,
TRIPPUNITHURA.
23rd November, 1937

K. Narayana Pisharoti.

समर्पणम्

वेदनिधेः प्रख्यातकुलाचारस्य श्रीभास्करशर्मणस्तातस्य चरणकमलयोः सस्नेहबहुमानभक्तिविनयादरं समर्पयामि ॥

ग्रन्थकर्ता

॥ हरिः ॥

॥ श्रीगणपतये नमः ॥

॥ वेदान्तपरिभाषासंग्रहः ॥

प्रणिपत्य गुरुं शेषमम्बां मातरमेव च ।
संग्रहः परिभाषायाः क्रियते रामवर्मणा ॥

धर्मार्थकाममोक्षभेदेन पुरुषार्थाश्चत्वारः । तत्र अन्त्य एव नित्यत्वात् परमपुरुषार्थः । 'न स पुनरावर्तत' इत्यादिश्रुत्या तस्य नित्यत्वम् । अन्ये त्वनित्याः, 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इत्यादिश्रुतेः । मोक्षश्च ब्रह्मज्ञानादेव भवति, 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुतेः । अतस्तत्सिद्धये ब्रह्म तज्ज्ञानं तत्प्रमाणं च निरूप्यते ॥

तत्र प्रमाकरणं प्रमाणम् । प्रमात्वं च द्विविधं—स्मृतिसाधारणं तदसाधारणं चेति । तत्राद्यमबाधितार्थविषयकज्ञानत्वम् । द्वितीयं त्वनधिगताबाधितार्थविषयकज्ञानत्वम् । स्मृतिवारणायानधिगतेति । तस्या अपि प्रमात्वे तत्करणस्यापि प्रमाणत्वप्रसङ्गः । धारास्थले तत्तत्क्षणानामपि विषयत्वात्, स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं घटादिविषयकैकवृत्तेरेव स्वीकारात् वृत्तिभेदेऽपि द्वितीयादिवृत्तेरलक्ष्यत्वाभ्युपगमाद्वा नाव्याप्तिः । अबाधितत्वं च संसारदशायामबाधितत्वम् । तेन वस्तुतो घटादेरपि मिथ्यात्वेऽपि न तज्ज्ञाने लौकिकप्रमारूपेऽव्याप्तिः ॥

प्रमाणानि च प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धयः षट् । तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम् । प्रत्यक्षप्रमा च मुख्या चैतन्यमेव, 'यत्साक्षादपरोक्षात्' इति श्रुतेः । अपरोक्षादिति पञ्चमी प्रथमार्थे । इन्द्रियसन्निकर्षादिजन्यान्तःकरणवृत्तिस्तु ज्ञानाभिव्यञ्जकत्वात् प्रमेत्युपचर्यते ।

तस्याश्च जन्यत्वात् तत्करणस्य चक्षुरादेः प्रमाणत्वम् । वृत्तिज्ञानं मनोधर्मः, 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतेः । तत्र धीशब्दो वृत्त्यभिधायी ॥

ज्ञाने विषये च प्रत्यक्षत्वव्यवहारोऽस्ति । तत्राद्ये वृत्तिचैतन्ये विषयचैतन्याभेदो नियामकः । द्वितीये विषये प्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यत्वम् । तथाहि । चैतन्यं त्रिविधं—विषयचैतन्यं वृत्तिचैतन्यमन्तःकरणचैतन्यं चेति । एतानि च क्रमात् प्रमेयप्रमाणप्रमातृचैतन्यापरनामानि । प्रत्यक्षस्थले तैजसमन्तःकरणं इन्द्रियद्वारा बहिर्निर्गत्य विषयदेशं गत्वा तदाकारेण परिणमते । स परिणामो वृत्तिरित्युच्यते ॥

चैतन्यभेदकोपाधीनां यत्रैकदेशस्थत्वं तत्र चैतन्यभेदो नोपगम्यते । घटाकाशमठाकाशयोर्भेदेऽपि मठस्थघटाकाशः यथा न मठाकाशाद्भिन्नः, यथा च तटाकजलघटजलयोर्भेदेऽपि तटाकस्थघटजलं न तटाकजलाद्भिन्नम्, तथा विषयेन्द्रियसन्निकर्षदशायां वृत्तेर्विषयस्य च एकदेशस्थत्वात् तच्चैतन्ययोरभेदेन वृत्तिचैतन्ये विषयचैतन्याभेदाद्वृत्तेः प्रत्यक्षत्वम् । एवं विषयस्य घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया तत्सत्तायाश्च, आरोपितनिष्ठसत्ताया अधिष्ठानसत्तातोऽनतिरिक्ततया, अधिष्ठानचैतन्यसत्तातो न भेदः । प्रत्यक्षस्थले उक्तरीत्या प्रमातृविषयचैतन्ययोरेकदेशस्थत्वेन विषयसत्तायाः प्रमातृचैतन्यसत्तातोऽप्यनतिरेकाद्विषये प्रत्यक्षत्वमुपपद्यते । सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चोपाध्योर्नियमेनैकदेशस्थत्वात् सुखादिविषयके मानसप्रत्यक्षेऽपि लक्षणसंगतिः ॥

तत्राद्ये प्रत्यक्षलक्षणे विषये तत्तदिन्द्रिययोग्यत्वं वर्तमानत्वं च विशेषणं देयम् । तेन वाक्यादिजन्ये अदृष्टादिज्ञाने, सुखादिस्मृतौ सुखाद्यंशे च नातिव्याप्तिः । एवं च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभिन्नत्वं ज्ञानात्मकप्रत्यक्षस्य लक्षणं पर्यवसन्नम् ॥

द्वितीयलक्षणेऽपि तत्तदाकारवृत्त्युपहितत्वं प्रमातरि, तत्तदिन्द्रिययोग्यत्वं च विषये, विशेषणं देयम् । इत्थं च तत्तदाकारवृत्त्युपहितप्रमातृचैतन्यसत्ताभिन्नसत्ताशून्यत्वे सति तत्तदिन्द्रिययोग्यत्वं विषयस्य

प्रत्यक्षत्वम् । रूपवान् घट इत्यादिप्रत्यक्षस्थले घटादिगतपरिमाणादावतिव्याप्तिवारणाय तत्तदाकारवृत्त्युपहितत्वं प्रमातृविशेषणम् । तत्र रूपाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च तदुपाध्योरेकदेशस्थत्वेन एकत्वात् रूपाद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नत्वं प्राप्तमित्यतिव्याप्तिः । रूपादिविषयकवृत्तिदशायां परिमाणाद्याकारकवृत्त्यभावाच्च न तत्रेदानीमतिप्रसङ्गः ॥

धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मादेः प्रत्यक्षत्वापत्तिवारणाय विशेष्यभागः । धर्मादेः गुरुत्वादिवत् स्वभावत एव अयोग्यत्वान्न तत्रातिव्याप्तिः ॥

सुखादिसत्त्वदशायां तु अहं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वापादनम् इष्टापत्त्या परिहरणीयम् । सन्निकृष्टविषये दशमस्त्वमसीत्यादिवाक्यादपि प्रत्यक्षाङ्गीकारात् ॥

पर्वतो वह्निमानित्यादिज्ञानं सन्निकृष्टविषयतया पर्वतांशे प्रत्यक्षम् । वह्नेरतथात्वेन तदंशेऽनुमितिः । अवच्छेदकभेदेन विरुद्धयोरपि प्रत्यक्षत्वानुमितित्वयोः कपिसंयोगतदभावयोरिव एकत्र समावेशः सूपपादः ॥

सुरभि चन्दनमित्यादौ सौरभांशे ज्ञानं परोक्षमेव, ज्ञानलक्षणायाः सन्निकर्षत्वानङ्गीकारात् । अतस्तत्र नाव्याप्तिशङ्कावकाशः ॥

न चैवमनवस्थाभिया वृत्तिगोचरापरवृत्तेरनङ्गीकरात् द्वितीयलक्षणस्य तत्तदाकारवृत्त्युपहितत्वघटितस्य वृत्तावव्याप्तिरिति वाच्यम् । वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाङ्गीकारेण स्वविषयवृत्त्युपहितप्रमातृचैतन्यघटितलक्षणस्य तत्राक्षतत्वात् । केवलसाक्षिवेद्यत्वस्य इन्द्रियानुमानादिप्रमाणव्यापारमन्तरेण साक्षिविषयत्वरूपत्वान्नान्तःकरणतद्धर्मादीनां तद्धानिः । इदं रजतमिति भ्रमस्थलेऽपि रजताकाराविद्यावृत्तेरभ्युपगमेन प्रातिभासिकरजतेऽपि लक्षणसंगतिः ॥

चैतन्याभिव्यञ्जकवृत्तिश्चेन्द्रियसन्निकर्षाज्जायते । ते च सन्निकर्षाः संयोग-संयुक्ततादात्म्य-संयुक्ताभिन्नतादात्म्यभेदात् त्रिविधाः । क्रमेण घटतद्रूपरूपधर्माणां वृत्तिजनने तेषामुपयोगः ॥

वृत्तिश्चतुर्विधा—संशयनिश्चयगर्वस्मरणभेदात् । वृत्तिभेदादेकमप्यन्तःकरणं मनः बुद्धिः अहंकारः चित्तमिति चाख्यां लभते । तदुक्तम्—

'मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥' इति ॥

निरुक्तं प्रत्यक्षं सविकल्पकनिर्विकल्पकभेदात् द्विविधम् । तत्र वैशिष्ट्यावगाहि प्रथमं, घटमहं जानामीत्याकारकम् । संबन्धानवगाहि तु द्वितीयं, यथा सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानम् । तस्येन्द्रियाजन्यत्वेऽपि प्रत्यक्षत्वम्, इन्द्रियजन्यत्वस्य तदप्रयोजकत्वात् । पूर्वोक्तप्रत्यक्षलक्षणस्य च तत्र सत्त्वात् । उक्तवाक्ययोर्विशिष्टार्थस्य विरुद्धत्वेन तात्पर्याविषयत्वात् । विरुद्धयोरुपाध्योस्त्यागे विशेष्यस्यैकत्वेन तस्यैव तात्पर्यविषयत्वेन तज्ज्ञानस्य संसर्गानवगाहितया निर्विकल्पकत्वमव्याहतमेव ॥

तच्च प्रत्यक्षं पुनरपि जीवसाक्षीश्वरसाक्षिभेदात् द्विविधम् । तत्रान्तःकरणविशिष्टं चैतन्यं जीवः, तदुपहितं जीवसाक्षि । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यां जीवसाक्षिणोर्भेदः । विशेषणोपाध्योर्व्यावर्तकत्वे समानेऽपि कार्यान्वयानन्वयाभ्यां भेदः । एवं च कार्यान्वयि व्यावर्तकं विशेषणम् । तदनन्वयि व्यावर्तकमुपाधिः । कार्यं=विधेयम् । रूपविशिष्टो घटोऽनित्य इति विशेषणोदाहरणम् । तत्र विशेष्यान्वयिन्यनित्यपदार्थे रूपस्यान्वयसंभवात् विशेषणत्वम् । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्युपाध्युदाहरणम् । तत्र विशेष्यान्वयिनि विधेये श्रोत्रेन्द्रिये कर्णशष्कुल्या अयोग्यत्वेनान्वयासंभवादुपाधित्वम् ॥

प्रकृते चान्तःकरणविशिष्टो जीव इत्यत्र विधेये जीवपदार्थेऽन्तःकरणस्यान्वयसंभवाद्विशेषणत्वम् । अन्तःकरणावच्छिन्नं साक्षीत्यत्र विशेष्यान्वयिनि विधेये साक्षिपदार्थे विषयावभासकेऽन्तःकरणस्य जडस्यान्वयायोग्यत्वात्तस्योपाधित्वम् । अन्तःकरणोपाधीनामनेकत्वेन जीवानां भेदात्तत्साक्षिणामपि भेदोऽङ्गीकार्यः । अन्यथा एकेनावगतस्यान्येनाप्यनुसंधानप्रसङ्गात् । ईश्वरोपाधिमायाया एकत्वेन ईश्वरस्यैकत्वम् । तस्या एकत्वे च—

'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥'

इत्यादीनि प्रमाणम् । एवं च मायाविशिष्टं चैतन्यमीश्वरः, तदुपहितं चैतन्यमीश्वरसाक्षीति विवेकः । तस्येश्वरस्यैकत्वेऽपि तदुपाधिमायागतसत्त्वरजस्तमोगुणैः प्रत्येकमुपाधिभूतैः क्रमाद्विष्णुब्रह्मशिवरूपास्त्रिमूर्तिविलासाः । तत्र ब्रह्मविष्णुशिवाः यथासंख्यं सृष्टिस्थितिसंहारकर्तारः । ईश्वरकूटस्थस्यानादित्वेऽपि परिपक्वप्राणिकर्मवशात्तदुपाधिभूतमायायाम्, इन्द्रियसन्निकर्षाज्जीवोपाध्यन्तःकरण इव, वृत्तिविशेषा उत्पद्यन्ते । वृत्तीनां जन्यत्वात् तत्प्रतिबिम्बितचैतन्येऽपि जन्यत्वव्यवहारः ॥

भ्रमस्यापि लक्ष्यत्वान्न तत्रातिव्याप्तिशङ्कावसरः । पूर्वोक्तलक्षणे उक्ताबाधितत्वस्यापि निवेशे प्रमामात्रस्य लक्षणं भवति । इदं रजतमित्यादिभ्रमस्य वास्तवरजतादिना सन्निकर्षाभावेन तद्विषयकत्वासंभवात् तत्कालोत्पन्नप्रातिभासिकरजतादिविषयकत्वस्वीकारस्यावश्यकत्वात् । ज्ञानलक्षणायाः सन्निकर्षत्वं तु नाङ्गीकृतम् ॥

प्रातिभासिकशुक्तिरजतादिपदार्थोत्पत्तौ च शुद्धरजतादिसामग्री नापेक्षिता । किंतु तत्र विलक्षणैव सामग्री । तथाहि । काचादिदुष्टदृष्टेः पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचक्याद्याकारा चान्तःकरणवृत्तिर्जायते । तस्यां वृत्ताविदमंशावच्छिन्नं चैतन्यं प्रतिबिम्बते । उपाधीनामुक्तरीत्या तत्रैकदेशस्थत्वेन तदुपहितानामैक्यं संभवति । इत्थं च इदमंशावच्छिन्नचैतन्याश्रिता शुक्तित्वप्रकारिकाऽविद्या चाकचक्यादिसादृश्यसंदर्शनसमुद्बोधितरजतसंस्कारेण काचादिदोषेण च सहिता रजताकारेण रजतज्ञानाभासाकारेण च परिणमते । तच्च रजतमविद्याधारे इदमवच्छिन्नचैतन्ये वर्तते । सर्वकार्यस्यापि स्वोपादानाविद्याश्रयनिष्ठत्वनियमात् । चैतन्यनिष्ठस्यापि रजतादेः पुरोवर्तिनाऽभेदेन भानं तु, नैयायिकनये आत्मनिष्ठस्य ज्ञानादेः शरीरनिष्ठत्वेनेव, तदवच्छेदकत्वादिति बोध्यम् ॥

प्रातिभासिकव्यावहारिकरजतयोरुभयोरप्यविद्याजन्यत्वेन साम्येऽप्यागन्तुकानियतकाचादिनानादोषजन्यत्व —नियतैकाविद्यादोषजन्यत्वाभ्यां

तयोर्वैलक्षण्यम् । स्वाप्नपदार्था अपि प्रातिभासिका एव, तेषां प्रत्यक्षतयाऽनुभवात् । 'अथ रथान् रथयोगान् पथः सृजते' इति रथादिसृष्टिप्रतिपादिका श्रुतिरप्यत्रानुग्राहिका । स्वाप्नपदार्थाः साक्षान्मायामया इत्येके । अन्तःकरणद्वारा तथेत्यपरे । अध्यासाधिष्ठानस्य चैतन्यस्य जागरे प्रत्यक्षाभावेऽपि स्वाप्नपदार्थानां जागरे नानुवृत्तिः, निवृत्तिरूपकार्यनाशेन तत्सिद्धेः । उपादानसद्भावदशायामपि विरोधिवृत्त्युत्पत्त्या दोषनिवृत्त्या वा कार्यनाशाङ्गीकारात् । प्रकृते च विरोधिप्रत्ययोत्पत्त्या निद्रादिनाशेन च स्वाप्नपदार्थाननुवृत्तिरुपपादयितुं शक्या । बाधरूपकार्यनाश एवाधिष्ठानसाक्षात्कारजन्योपादाननाशस्यापेक्षितत्वात् प्रकृते तदभावेऽपि न क्षतिः ॥

शुक्तिरजतादेः शुक्त्यवच्छिन्नतूलाविद्याकार्यत्वपक्षे अधिष्ठानतत्त्वज्ञानात्तस्याविद्यया सह बाधः । मूलाज्ञानकार्यत्वपक्षे तन्नाशस्य ब्रह्मसाक्षात्कारैकसाध्यतया शुक्तित्वादिज्ञानेन शुक्तिरजतादेर्घटादेर्दण्डप्रहारादिनेव तदानीं निवृत्तिमात्रम्, न त्वत्यन्तनाशः ॥

जपासक्तस्फटिके रक्तत्वभ्रमस्थले न प्रातिभासिकरक्तोत्पत्तिरङ्गीक्रियते, तत्रेन्द्रियसन्निकर्षस्य विद्यमानत्वेन तेनैव प्रत्यक्षत्वनिर्वाहात् । यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तिरावश्यकी ॥

प्रत्यक्षं पुनर्द्विविधं—इन्द्रियजन्यं तदजन्यं चेति । तत्राद्यं चक्षुरादीन्द्रियभेदात् पञ्चविधम् । द्वितीयं सुखादिप्रत्यक्षम् । तत्र मनस एव कारणत्वात् मनसश्च सिद्धान्ते इन्द्रियत्वस्यानङ्गीकारात् । तत्र घ्राणं रसनं त्वक् च स्वस्थानस्थितान्येव विषयान् गृह्णन्ति । इतरे तु विषयदेशं गत्वा विषयं गृह्णीतः । वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशे भेर्याद्यवच्छेदेनोत्पन्नशब्दस्य उत्पत्तिकल्पनं, 'भेरीशब्दो मया श्रुत' इति प्रतीतेः सजातीयाविषयत्वकल्पनं च गौरवात् क्लिष्टत्वाच्च न संभवति ॥

॥ इति प्रत्यक्षनिरूपणम् ॥

॥ अथानुमाननिरूपणम् ॥

इदानीमनुमानं निरूप्यते । अनुमितिकरणमनुमानम् । व्याप्तिज्ञानत्वेन तज्जन्यं ज्ञानमनुमितिः । व्याप्तिसंस्कारोऽव्यवहितकारणत्वात् व्यापारः । महानसादावनुभूताया धूमनिष्ठवह्निव्याप्तेः संस्कारस्य पर्वतादौ धूमदर्शनेनोद्बोधे सति अव्यवहितोत्तरक्षणे वह्न्यनुमितिर्जायते । मध्ये व्याप्तिस्मरणं परामर्शो वा नापेक्षितः, प्रमाणाभावात् गौरवाच्च । अनुमितेः संस्कारजन्यत्वेन स्मृतित्वापादनं न संभवति । संस्कारध्वंसादावतिप्रसङ्गेन संस्कारजन्यत्वस्य स्मृतित्वे अप्रयोजकत्वात् । इत्थं चानुमितौ जननीयायां पक्षधर्मताज्ञानेनोद्बुद्धव्याप्तिसंस्कारादन्यन्नापेक्षितमस्ति । व्याप्तिज्ञानस्य च वह्निज्ञानांश एवोपयोगः, तदंश एव तस्यानुमितित्वात् ॥

व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यम् । तद्ग्रहे सहचारज्ञानं कारणम् । तच्च भूयोदर्शनमेवेति नियमस्तु न । व्यभिचारास्फूर्तौ सकृद्दर्शनेनापि व्याप्तिनिश्चयदर्शनात् ॥

अनुमानमन्वयिनामकमेकमेव । सर्वेषामपि धर्माणां ब्रह्मण्यसद्भावात् केवलान्वय्येवाप्रसिद्धः । साध्याभावे हेत्वभावव्याप्तेः साध्यानुमितावप्रयोजकत्वाद्व्यतिरेक्यप्रसिद्धः । व्यतिरेकव्याप्तिमात्रग्रहात् साध्यज्ञानमर्थापत्त्येत्यग्रे स्फुटीभविष्यति ॥

अनुमानं स्वार्थपरार्थभेदेन द्विविधम् । तत्राद्यं निरूपितम् । द्वितीयं न्यायसाध्यम् । न्यायोऽवयवसमुदायः । अवयवत्रयेणैवानुमितिनिर्वाहादितरत् द्वयमनर्थकम् । प्रतिज्ञाहेतूदाहरणानि उदाहरणोपनयनिगमनानि वा अवयवाः । व्याप्तिपक्षधर्मतयोर्ज्ञानस्य अन्यतरसमुदायेनैव सिद्ध्या अन्यद्वयस्यात्रानुपयोगात् ॥

॥ इत्यनुमाननिरूपणम् ॥

॥ अथोपमाननिरूपणम् ॥

इदानीमुपमानं निरूप्यते । उपमितिकरणमुपमानम् । गृहे दृष्टगोपिण्डकस्य पुरुषस्य वने गवयेन्द्रियसंयोगे सति यज्ज्ञानम् 'अयं पिण्डो मद्गोसदृशः' इति तत् करणम् । तदनन्तरम् 'अनेन सदृशी मदीया गौः' इति यो निश्चयो जायते तत् गोनिष्ठगवयसादृश्यज्ञानं फलमुपमितिः । तच्च न प्रत्यक्षेण निर्वहति, तदानीं गोव्यक्तेरिन्द्रियासन्निकृष्टत्वात् । नाप्यनुमानेन, व्याप्तिज्ञानाद्यभावेऽपि तादृशप्रतीतेः संभवात् । उपमिनोमीति प्रतीतेर्विलक्षणत्वाच्च तस्याः प्रमित्यन्तरत्वम् ॥

॥ इत्युपमानम् ॥

॥ अथागमः ॥

सजातीयप्रमाणान्तराबाधिततात्पर्यविषयपदार्थसंसर्गबोधकवाक्यं प्रमाणशब्दः । सर्वेषां व्यावहारिकपदार्थानां ब्रह्मप्रमाबाध्यत्वात्सजातीयेति । 'घटमानय' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिलौकिकवैदिकवाक्येषु लक्षणसंगतिः । तदर्थघटानयन-यागस्वर्गसाध्यसाधनभावादिसंसर्गस्य पारमार्थिकतत्त्वावेदकवेदान्तवाक्यैर्बाधेऽपि व्यावहरिकतत्त्वावेदकप्रमाणैरबाधात् ॥

आकाङ्क्षा-योग्यताऽसत्ति-तात्पर्यज्ञानानि वाक्यार्थज्ञाने कारणानि । तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकाङ्क्षा । सा च क्रियाकारकपदानाम् । क्रियाश्रवणे कारकस्य, कर्मादिकारकश्रवणे क्रियायाश्च जिज्ञासोदयात् । क्वचिज्जिज्ञासाविरहेऽपि बोधोदयात् योग्यत्वानुधावनम् । 'नीलमुत्पलं' 'तत्त्वमसि' इत्यादावभेदान्वयबोधानुरोधेनाभेदान्वयबोधे समानविभक्तिकत्वमित्याद्यूह्यम् । तात्पर्यविषयसंसर्गाबाधो योग्यता । 'वह्निना सिञ्चेत्' इति वाक्यं न योग्यम्, तत्र तात्पर्यविषयसंसर्गस्य बाधितत्वात् ।

आदित्यो यूप इत्यादावभेदसंसर्गस्य बाधेऽपि तस्य तात्पर्याविषयत्वात्, यूपप्राशस्त्यस्यैव तात्पर्यविषयत्वात्, तस्य चाबाधितत्वान्न योग्यताहानिः । 'तत्त्वमसि' 'सोऽयं देवदत्त' इत्यादौ वाच्यार्थाभेदस्य बाधेऽपि तात्पर्यविषयलक्ष्यार्थसंसर्गस्याबाधितत्वाद्योग्यतोपपत्तिः । अव्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिः । पदजन्यत्वविशेषणं च मानान्तरोपस्थापितानां बोधहेतुत्ववारणाय । द्वारमित्यादावपि पिधेहीत्यादिपदाध्याहारादेव बोधः ॥

पदार्थो द्विविधः—शक्यो लक्ष्यश्चेति । तत्राद्यो मुख्यः । शक्यत्वं=शक्तिविषयत्वम् । शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः । यथा गोपदस्य सास्नादिमति । सा च शक्तिः पदार्थान्तरं कार्यानुमेयेति च सिद्धान्तः । सा च शक्तिर्जातावेव । तद्भासकसामर्थ्यैव व्यक्तिभानम्, लाघवात् । यद्वा व्यक्तावपि शक्तिः स्वीक्रियते । सा स्वरूपसती शाब्दबोधे कारणम्, जातिशक्तिस्तु ज्ञातेति भेदः । नीलादिपदादिव धर्मिभानं लक्षणयेति केचित् । द्वितीयोऽमुख्यः । लक्षणाविषयत्वं लक्ष्यत्वम् ॥

लक्षणा शक्यसंबन्धः । सा च द्विविधा—केवला लक्षितलक्षणा चेति । तत्र शक्यसाक्षात्संबन्ध आद्या । यथा गङ्गायां घोष इत्यादौ । तत्र शक्यार्थस्य प्रवाहादेः साक्षात्संबन्धस्य तीरादौ सत्त्वात् । यत्र परम्परासंबन्धस्तत्र द्वितीया । यथा द्विरेफादिपदे । तत्र स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिपरम्पराया एव संबन्धत्वात् । गौणी तु नापरा वृत्तिः, किंतु लक्षितलक्षणैव । सिंहो माणवक इत्यादौ सिंहादिपदशक्यनिष्ठक्रौर्यादिसदृशक्रौर्यादिरूपपरम्परयैव तत्र बोधनिर्वाहात् ॥

लक्षणा पुनस्त्रिविधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति । यत्र शक्यमनन्तर्भाव्य पदार्थान्तरप्रतीतिः तत्राद्या । यथा शत्रुगृहे भोजनानुमतिं प्रार्थयन्तं प्रत्युत्तरं—'विषं भुङ्क्ष्व' इति । शत्रुगृहे भोजननिवृत्तिरभिमतार्थः । स्वार्थस्य भानं तु नास्त्येव । नीलमुत्पलमित्यादौ द्वितीया । तत्र वाच्यार्थं नीलरूपमपरित्यज्यैव तद्वति लक्षणाङ्गीकारात् । एवं काकेभ्यो दधि रक्ष्यतामित्यादावपि । तत्र काकाद्यपरित्यागेन दध्युपघातकमार्जारादेरपि बोधात् । सोऽयं देवदत्तः, तत्त्वमसीत्यादौ तृतीया । तत्राद्ये

तद्देशतत्कालविशिष्टत्वैतद्देशैतत्कालविशिष्टत्वयोः, द्वितीये सर्वज्ञत्वकिंचिज्ज्ञत्वयोश्च विरुद्धत्वात्तद्विशिष्टयोरभेदासंभवेनाविशेष्यमात्रपरत्वमुभयत्रापीति ॥

लक्षणाबीजं तात्पर्यानुपपत्तिरेव । काकेभ्यो दधि रक्ष्यतामित्यादौ व्यभिचारेणान्वयानुपपत्तेरसार्वत्रिकत्वात् ॥

वाक्येऽपि लक्षणाऽस्ति । गभीरायां नद्यां घोष इत्यत्र वाक्यस्य गभीरनदीतीरे लक्षणा । वाक्ये प्रत्येकशक्त्यभावेऽपि तद्घटकपदशक्त्यधीनप्रतीतिविषयरूपशक्यसंबन्धस्य तीरे सत्त्वान्नानुपपत्तिः । वाक्यार्थज्ञाने पदार्थज्ञानस्य तज्ज्ञाने शक्तिज्ञानस्य च हेतुतया शक्त्यधीनत्वं वाक्यजन्यप्रतीतेरुपपद्यते । स्तुत्यर्थवादवाक्यानां तेजो वै घृतमित्यादीनां प्राशस्त्ये, सोऽरोदीदित्यादिनिन्दार्थवादवाक्यानां कुत्सितत्वे च लक्षणा ॥

तात्पर्यं=तत्प्रतीतिजननयोग्यत्वं, तत्रावच्छेदिका शक्तिरेव। अस्मिन् मते सर्वत्र कारणतायां शक्तेरेवावच्छेदकत्वात् । तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वं तात्पर्यमिति तु निष्कर्षः ॥

तात्पर्यग्रहश्च वेदे—

'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥'

इत्युक्तप्रकारेण मीमांसापरिशोधितन्यायात्, लोके प्रकरणादिना च भवति ॥

वेदानां सिद्धान्ते, न नैयायिकानामिव क्षणिकत्वं, न वा मीमांसकानामिव नित्यत्वम्, किंतु उत्पत्तिमत्त्वं, सृष्टिकाले ईश्वररचितत्वस्य 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद' इत्यादिश्रुतिसिद्धत्वात् । प्रलयकाले च तेषां वियदादीनामिव नाशः। एवं सति वेदस्य ईश्वरकृतत्वेनापौरुषेयत्वसिद्धान्तभङ्ग इति न शङ्कनीयम्। सजातीयोच्चारणानपेक्षोच्चारणविषयत्वस्यैव पौरुषेयत्वस्य विवक्षितत्वात् । सर्गाद्यकाले पूर्वसर्गसिद्धानुपूर्व्यैव वेदस्येश्वरेण रचनात्तादृशपौरुषेयत्वं तत्र नास्त्येव। भारतादिकं व्यासादिना स्वत एव कृतमिति तस्य सजातीयोच्चारणानपेक्षोच्चारणविषयत्वरूपपौरुषेयत्वमस्त्येव। एवंच पौरुषेयापौरुषेयभेदेनागमो द्विविध इति बोध्यम् ॥

॥ इत्यागमः ॥

॥ अथार्थापत्तिः ॥

उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं कारणम् उपपादकज्ञानं फलमिति विवेकः । पीनो देवदत्तो दिवा न भुङ्क्ते इत्याद्युदाहरणम् । येन विना यदनुपपन्नं तत्तत्रोपपाद्यम् । यथा रात्रौ भोजनं विना दिवा अभुञ्जानस्य पीनत्वमनुपपन्नमिति तदुपपाद्यम् । यस्याभावे यस्यानुपपत्तिः तत्तत्रोपपादकम् । यथा रात्रिभोजनाभावे दिवाऽभुञ्जानस्य पीनत्वमनुपपन्नमतो रात्रिभोजनमुपपादकम् ॥

अर्थस्यापत्तिः कल्पनमिति व्युत्पत्त्या फले, अर्थस्यापत्तिर्यस्मादिति व्युत्पत्त्या करणे चार्थापत्तिशब्दस्य प्रवृत्तिः । सा च दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति द्विविधा । पुरोवर्तिरङ्गादिविषयकेदं रजतमितिज्ञानानन्तरं यत्र नेदं रजतमिति ज्ञानं जायते तत्राद्या । तत्र निषेध्यत्वमुपपाद्यम्, तच्च रजतस्य सत्यत्वे नोपपद्यत इति सन्निहितत्वरूपमिथ्यात्वमुपपादकम् । यत्र 'तरति शोकमात्मवित्' इति वेदवाक्यबोधितात्मज्ञाननिष्ठसंसाररूपशोकनिवर्तकत्वानुपपत्त्या संसारमिथ्यात्वकल्पनं तत्र द्वितीया । तत्र ज्ञानस्य संसारनिवर्तकत्वमुपपाद्यं, संसारमिथ्यात्वमुपपादकम् । एवमुदाहरणान्तराण्यप्यूह्यानि ॥

श्रुतार्थापत्तिर्द्विविधा—अभिधानानुपपत्तिमूला, अभिहितानुपपत्तिमूला चेति । तत्राभिधानं तात्पर्यम् । द्वारमित्याद्याद्योदाहरणम् । तत्र द्वारकर्मकपिधानबोधतात्पर्यमुपपाद्यं, पिधेहिपदाध्याहार उपपादकम् । तत्र तत्पदाध्याहारं विना तादृशबोधपरत्वानिर्वाहात् । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्याद्यन्त्योदाहरणम् । तद्वाक्यात्तादृशयागस्य स्वर्गसाधनत्वमभिहितम् । तदुपपाद्यं, अपूर्वं विना नष्टो यागो बहुकालानन्तरभाविस्वर्गं जनयितुं नालमित्यपूर्वस्य कल्पकं भवेत् ॥

व्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वानङ्गीकारात् अर्थापत्तेर्नानुमानेन गतार्थता । पृथिवी इतरेभ्यो भिद्यत इत्यादावितरभेदादेरर्थापत्त्यैव सिद्धिः । अत एव तत्र अनुव्यवसाय इतरभेदं कल्पयामीत्येव नानुमिनोमीति ॥

॥ इत्यर्थापत्तिः ॥

॥ अथानुपलब्धिः ॥

ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिप्रमाणम् । अदृष्टाद्यभावविधेयकानुमितिकरणेऽतिव्याप्तिवारणायाजन्यान्तम् । घटादिवारणाय विशेष्यभागः[१] । घटादिप्रत्यक्षमादाय चक्षुरादावतिप्रसङ्गवारणायाभावेति । साधारणकारणादृष्टादिवारणायासाधारणेति । अभावस्मृत्यसाधारणकारणसंस्कारवारणायानुभवेति । यदि च स्मृतावनुभवस्यैव करणत्वं संस्कारस्तु व्यापार एव तदाऽनुभवत्वेन निवेशो माऽस्तु । ज्ञानकरणजन्यत्वात् स्मृतेरजन्यान्तेनैव वारणात् ॥

योग्यानुपलब्धिरेवाभावग्राहिका । तत्र योग्या चासावनुपलब्धिश्चेति विग्रहः । अनुपलब्धौ योग्यत्वं प्रतियोगिसत्त्वव्यापकोपलम्भकत्वम् । इत्थं चालोकादिचाक्षुषकारणकलापवति भूतलादौ घटाद्यभावस्यानुपलब्धिगम्यत्वम् , एवं स्तम्भादौ पिशाचाद्यन्योन्याभावस्यानुपलब्धिगम्यत्वं चोपपद्यते । आत्मादावदृष्टादिविरहस्य पिशाचादौ स्तम्भादिभेदस्य चानुपलब्धिगम्यत्वस्य नेदानीमापत्तिः । अधिकरणादाविन्द्रियसन्निकर्षसत्त्वात्तद्ग्रहस्य इन्द्रियकरणकत्वेऽपि अभावेन इन्द्रियाणां सन्निकर्षाभावान्न तद्ग्रहस्य तत्करणकत्वम् । इन्द्रियाणामन्वयव्यतिरेकाभ्यामभावग्रहे अपेक्षितत्वेऽपि तेषामधिकरणादिप्रत्यक्षे उपक्षीणत्वात् अभावग्रहं प्रत्यन्यथासिद्धत्वमेव । प्रत्यक्षत्वं तु नेन्द्रियजन्यत्वव्याप्यं, दशमस्त्वमसीत्यादिवाक्यजन्ये प्रत्यक्षे व्यभिचारात् । तत्र यथा शब्दः करणम्, एवमभावप्रत्यक्षेऽनुपलब्धिरिति बोध्यम् । भूतले घटो नास्तीत्यभावानुभवस्थले वृत्तिनिर्गमावश्यंभावेन भूतलावच्छिन्नचैतन्यमिवाभावावच्छिन्नचैतन्यमपि प्रमात्रभिन्नमिति प्रत्यक्षत्वे समानेऽपि वृत्तिवैजात्यात् प्रमाणवैजात्यसिद्धिः । वृत्त्योस्त्विन्द्रियजन्यत्वतदजन्यत्वाभ्यां भेदः स्फुट एव । इत्थं चाभावप्रत्यक्षे सन्निकर्षाभावादिन्द्रियाणां न करणत्वम् । अनुपलब्धेस्तत्संभवाच्च प्रमाणान्तरत्वमुपगन्तव्यम् ॥

---

१. विशेष्यभागः = अभावानुभवेति भागः ॥

अभावश्चतुर्विधः—प्रागभावो ध्वंसोऽत्यन्ताभावोऽन्योन्याभावश्चेति । तत्र प्रथमः कारणे कार्योत्पत्तिपूर्वक्षणपर्यन्तं वर्तमानो भविष्यतीति प्रतीतिसाक्षिकोऽभावः । कार्योत्पत्तिक्षणे च तस्य नाशः । तत्रैव घटादेर्मुद्गरपाताद्यनन्तरं नष्ट इति प्रतीतिसाक्षिकोऽभावो द्वितीयः । सोऽपि स्वाधिकरणकपालादिनाशे नश्यत्येव, ब्रह्मातिरिक्तस्य सर्वस्याप्येतन्मतेऽनित्यत्वेन ध्वंसाधिकरणस्य नित्यत्वे कथमिति शङ्काया एव नावसरः । यत्र यस्य कालत्रयेऽप्यभावः स तृतीयः । यथा वाय्वादौ रूपादिकं नेति प्रतीतिविषयः । सोऽप्याकाशादिवद्विनाशी । घटो न पट इत्यादिप्रतीतिसिद्धश्चतुर्थोऽन्योन्याभावः । पृथक्त्वं विभाग इत्यादिशब्दैः व्यवह्रियमाणः स एव । भेदातिरिक्तविभागादौ प्रमाणाभावात् गौरवाच्च । अयं चाधिकरणस्य सादित्वे सादिः, तस्यानादित्वे अनादिः । यथा घटपटयोर्जीवब्रह्मणोश्च भेदः॥

स पुनर्द्विविधः—सोपाधिकनिरुपाधिकभेदात् । य उपाधिसत्तायामेव वर्तते स आद्यः । उपाधिसत्ताव्याप्यसत्ताक इति यावत् । यश्चोपाधिसत्ताधीनो न भेदः किं तु स्वतःसिद्धः स द्वितीयः । एकस्यैवाकाशस्य घटाद्युपाधिभेदाद्यो भेदः, एकस्य चन्द्रस्य जलभाजनभेदाद्यो भेदः, एकस्य ब्रह्मणः अन्तःकरणभेदाद्यो भेदः, तानि प्रथमस्योदाहरणानि । घटादौ पटादिभेदो द्वितीयोदाहरणम् ॥

॥ इत्यनुपलब्धिः ॥

॥ अथ प्रामाण्यवादः ॥

उक्तप्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च । तथाहि । तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वं स्मृत्यनुभवसाधारणम् । तत्र ज्ञानसामान्यसामग्री प्रयोजिका । अधिकस्य गुणस्य तत्र हेतुत्वं नाङ्गीक्रियते, अनुगतगुणस्य दुर्वचत्वात् । दोषाभावस्यापि प्रतिबन्धकाभावविधया प्रमायां कारणतया ज्ञानसामान्यसामग्र्याः भ्रमप्रमोभयसाधारण्येऽपि न भ्रमस्य

प्रमात्वापत्तिः । ज्ञानसामग्र्यनन्तर्गतभावकारणानपेक्षत्वस्यैव स्वतस्त्वाद्दोषाभावस्याधिकस्य प्रमायां हेतुत्वेऽपि न तद्धानिः । दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वस्य स्वतोग्राह्यत्वरूपत्वान्न तस्यापि क्षतिः । साक्षिणा वृत्तिज्ञाने गृह्यमाणे तद्गतप्रामाण्यस्यापि तेनैव ग्रहणं संभवति । प्रामाण्यसंशयस्थले संशयानुरोधेन दोषस्याप्यावश्यकतया दोषाभावघटितायाः स्वाश्रयग्राहकसामग्र्या अभावेन तत्र प्रामाण्यग्रहस्यैवानुदयान्न तदनुपपत्तिः । यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वमित्युच्यते । तस्य च संशयस्थलेऽपि सत्त्वान्न दोषः । परं तु संशयजनकदोषसमवधानेन प्रामाण्याग्रहान्न संशयानुपपत्तिरिति मन्तव्यम् । ज्ञानसामान्यसामग्री नाप्रामाण्ये प्रयोजिका, तथा सति प्रमाया अप्यप्रामाण्यापत्तेः, किन्तु दोषस्तत्प्रयोजकः । अप्रामाण्यघटकसकलपदार्थानां साक्षिणा ग्रहीतुमशक्यतया न तस्य स्वतोग्राह्यत्वम् किन्त्वनुमानगम्यत्वमेव । एवं चाप्रामाण्यस्योत्पत्तिर्ज्ञानं च परत एव ॥

॥ इति प्रामाण्यवादः ॥

॥ अथ विषयनिरूपणम् ॥

उक्तप्रमाणानां प्रामाण्यं व्यावहारिकतत्त्वावेदकत्वपारमार्थिकतत्त्वावेदकत्वभेदेन द्विविधम् । तत्र ब्रह्मस्वरूपातिरिक्तविषयकाणां प्रथमम् । व्यवहारदशायामबाधितत्वं व्यावहारिकत्वम् । तच्च भूतभौतिकानां सर्वेषामस्ति, तेषां व्यवहारदशायां कदाऽपि बाधाभावात् । जीवब्रह्मैक्यपराणां तत्त्वमसीत्यादीनां द्वितीयम् । कालत्रयेऽप्यबाधितत्वं पारमार्थिकत्वम् । तच्च महावाक्यार्थे जीवपरैक्ये अस्ति, तस्य कदाऽपि बाधाप्राप्तेः । तस्य चैक्यस्य ज्ञानं तत्त्वंपदार्थज्ञानादेव भवति । अतस्तत्पदार्थो लक्षणप्रमाणाभ्यां प्रथमं निरूप्यते ॥

स्वरूपतटस्थभेदेन लक्षणं द्विविधम् । तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणं, यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतिबोधितं सत्यज्ञानादिकं ब्रह्मणो लक्षणम् । स्वरूपस्यापि कल्पनया धर्मत्वस्य संभवान्न लक्षणत्वहानिरिति बोध्यम् । तदुक्तम्—'आनन्दो विषयानुभवो नित्यत्वं चेति धर्माः अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते' इति । अयावल्लक्ष्यभावित्वे सति व्यावर्तकं तटस्थलक्षणम् । यथा गन्धवत्त्वादिकं पृथिव्यादेः । महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु च तदभावाद्व्यावर्तकत्वाच्च तथात्वम् ॥

ब्रह्मणश्च जगत्सृष्ट्यादिकर्तृत्वं तटस्थलक्षणम् । उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम् । ईश्वरस्य तत्सत्त्वे च 'यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते' 'सोऽकामयत बहु स्यां प्रजायेयेति' 'तन्मनोऽकुरुत' इत्यदिश्रुतयो मानम् । अत्र च जन्माद्यन्यतमस्यैव कार्यकोटौ ज्ञानाद्यन्यतमस्यैव कारणकोटौ च प्रवेशः, नतु जन्मादित्रयस्य ज्ञानादित्रयस्य च, प्रयोजनाभावात् । इत्थं च सृष्ट्यनुकूलज्ञानवत्त्वरूपस्रष्टृत्वादिरूपाणि नव लक्षणानि । ब्रह्मणः सृष्ट्यादिकर्तृत्वे च 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुतिर्मानम् ॥

यद्वा सकलकार्योपादानत्वं ब्रह्मलक्षणम् । तच्च जगदध्यासाधिष्ठानत्वं, जगदात्मना परिणममानमायाधिष्ठानत्वं वा । तादृशाध्यासे च 'इदं सर्वं यदयमात्मा' इत्याद्याः श्रुतयो मानम् । घटादावस्ति भातीष्ट इति व्यवहारश्च तत्र जगद्ब्रह्मणोस्तादात्म्याध्यासेन ब्रह्मगतधर्माणां घटादौ भानात् । दुःखस्याप्यानन्दात्मकब्रह्माध्यासेऽपि न तत्रेष्टत्वव्यपदेशः । तथा प्रतीत्यभावेन तत्रानन्दांशाध्यासानङ्गीकारात् । जगति नामरूपव्यपदेशः स्वपरिणाम्यविद्याधीनः । तदुक्तं पञ्चदश्याम्—

१. यथा अयो दहतीत्यादिव्यवहारेण अग्न्ययःपिण्डयोस्तादात्म्याध्यासेनाग्निगतधर्माणामयसि भानं तथेति बोध्यम् ॥

२. आरोपजनकदोषस्य फलमात्रोन्नेयत्वादिति भावः ॥

'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥' इति ॥

अथ जगत्सृष्टिप्रकारो निरूप्यते । सर्गाद्यकाले परमेश्वरः सृज्यमान-प्रपञ्चवैचित्र्यहेतुप्राणिकर्मवासनासहकृतोऽपरिमितानिरूपितशक्तिविशेषवि–शिष्टमायासहितः सन् नामरूपात्मकनिखिलप्रपञ्चं यथापूर्वं बुद्धावाकलय्य इदं करिष्यामीति संकल्पयति । 'तदैक्षत बहु स्यां प्रजायेयेति' 'सोऽकामयत बहु स्यां प्रजायेयेति' इत्यादिश्रुतेः । स च संकल्पः मायावृत्तिरूपः सिसृक्षेत्युच्यते ॥

ततस्तमःप्रधानप्रकृतेः आकाशादीनि पञ्च भूतानि अपञ्चीकृ-तानि तन्मात्राभिधानि जायन्ते । तत्राकाशस्य शब्द एव गुणः । वायु-तेजोजलभुवां क्रमाच्छब्दस्पर्शौ, शब्दस्पर्शरूपाणि, शब्दस्पर्शरूपरसाः, शब्दस्पर्शरूपरसगन्धाश्च गुणा बोध्याः । पञ्चानामपि भूतानामेकैको गुणः स्वाभाविकः, इतरे कारणगुणोत्पन्ना इति ध्येयम् ॥

इमानि च भूतानि सत्त्वरजस्तमोगुणकार्याणि । भूतानां सत्वांशैः क्रमाच्छ्रोत्रत्वगक्षिरसनघ्राणान्युत्पद्यन्ते । तैरेव मिलितैरन्तःकरणं जायते । अन्तःकरणस्यैव वृत्तयो मनोबुद्ध्यहंकारचित्तानि । श्रोत्रादीन्द्रियाणां दिग्वातार्कवरुणाश्विनोऽधिष्ठातारः । घ्राणस्य पृथिव्यधिष्ठातृदेवतेत्यन्ये । अन्तःकरणवृत्तीनां क्रमाच्चन्द्रब्रह्मरुद्रविष्णवो देवताः ॥

भूतानां रजोंशैः क्रमाद्वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि भव-न्ति । वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयः क्रमात्तेषामधिष्ठातृदेवताः । पायोर्मित्रो देवतेत्येके । भूतानां रजोंशैर्मिलितैः पञ्च वायवो जायन्ते । ते च प्राणापानव्यानोदानसमानसंज्ञा भवन्ति ॥

एभ्यः सूक्ष्मभूतेभ्यो महाभूतान्युत्पद्यन्ते । तान्येव पञ्चीकृत-भूतान्युच्यन्ते । पञ्चीकरणं च—

'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥'

इत्युक्तप्रकारम् । पृथिव्यादावुक्तप्रकारेणेतरभूतांशसद्भावेऽपि पृथिव्याद्याधिक्येन तद्व्यवहारः, 'वैशेष्यात्तु तद्वादस्तद्वाद' इत्युक्तेः ॥

लोकान्तरयात्रानिर्वाहार्थं जीवानां सूक्ष्मशरीरमङ्गीक्रियते । तच्च—

'पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥'

इत्युक्तम् । तच्च जीवानां मोक्षपर्यन्तं तिष्ठति । तच्च लिङ्गशरीरं द्विविधम्—परमपरं चेति । हिरण्यगर्भलिङ्गशरीरं जीवलिङ्गसमष्टिरूपं तत्राद्यम् । तदेव महत्तत्त्वमित्युच्यते । अस्मदादिलिङ्गशरीरमन्त्यमहंकाराख्यम् ॥

पञ्चीकृतभूतेभ्यश्चतुर्दशभुवनानां तद्गतभोग्यादिनिखिलपदार्थानां चोत्पत्तिः । पञ्चतन्मात्रोत्पत्तौ लिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ चेश्वरस्य साक्षात्, इतरप्रपञ्चोत्पत्तौ हिरण्यगर्भद्वारा कर्तृत्वं बोध्यम् । 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति श्रुतेः । अयं च हिरण्यगर्भो मूर्तित्रयादन्यः प्रथमो जीवः । 'स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥ हिरण्यगर्भः समवर्तताग्रे' इत्यादिश्रुतेः ॥

अथ प्रलयः । त्रैलोक्यनाशरूपप्रलयो नित्यप्राकृतनैमित्तिकात्यन्तिकभेदाच्चतुर्धा भवति ॥

तत्र प्रथमः सुषुप्तिः, तदा सर्वकार्याणां लयात् । धर्माधर्मपूर्वसंस्काराणां च तदा स्वस्वकारणात्मनाऽवस्थानादनन्तरं सुखादेः स्मृतेश्च नानुपपत्तिः । सुषुप्तिकालेऽन्तःकरणस्यापि लीनत्वाच्छ्वासोपलम्भो भ्रमः । यद्वाऽन्तःकरणस्य शक्त्योर्ज्ञानक्रियारूपयोः आद्याया एव तदानीं लयः, तेन प्राणाद्यवस्थाने न विरोधः ॥

कार्यब्रह्मनाशजन्यः सकलकार्यनाशो द्वितीयः । ब्रह्मणः स्वाधिकारनिर्वाहकप्रारब्धावसाने लब्धसाक्षात्कारैः स्वलोकनिवासिभिः सर्वैः सह मुक्तिः ।

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥'

इति श्रुतेः । एवं ब्रह्मणि स्वलोकवासिभिः सह मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्गतसकललोकानां तदन्तर्वर्तिनिखिलभूतभौतिककार्याणां च प्रकृतौ मायात्मिकायां लयो न ब्रह्मणि । अत एवायं प्राकृतप्रलय इत्युच्यते ॥

कार्यब्रह्मणो दिवसावसानभवस्तृतीयः । तदा त्रैलोक्यस्यैव नाशः । ब्रह्मणो दिवसश्च 'चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते' इति वचनबोधितश्चतुर्युगसहस्रपरिमितः कालः । तावानेव रात्रिसमयः । रात्रिदिवसयोः परिमाणस्य तुल्यत्वात् । सा च रात्रिरुक्तप्रलयः ॥

ब्रह्मसाक्षात्कारजन्यः सर्वमोक्षश्चतुर्थः । स चैकजीववादे सर्वेषां युगपदेव, नानाजीववादे क्रमेण भवति । 'सर्वे एकीभवन्ति' इति श्रुतेः । अयं चतुर्थः प्रलयः तत्त्वज्ञानमात्रसाध्यः । अन्ये त्रयोऽपि कर्मनाशाधीनाः ॥

प्रलये क्रमः सृष्टेर्विपरीतः । तथाच पृथिव्यादीनाम् अबादिषु क्रमाल्लयो बोध्यः । तथाच विष्णुपुराणे—

'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥

वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन्निष्कले च प्रलीयते ॥' इति ।

एतादृशप्रलयकर्तृत्वमपि तत्पदार्थब्रह्मणस्तटस्थलक्षणम् ॥

एवं सृष्ट्यादेः श्रुतिसिद्धत्वेऽपि न तस्य वास्तवत्वे श्रुतेस्तात्पर्यम्, अद्वैतव्याकोपात् । किं त्वद्वैतदार्ढ्यायैव श्रुत्यादिषु तद्वर्णनम् । तथाहि— सृष्ट्यादिकमनुक्त्वा ब्रह्मणि प्रपञ्चे निषिद्धे सति वाग्वादौ प्रतिषेध्यस्य रूप्यादेरिवान्यत्र प्रसिद्धिराशङ्क्येत । तथाचाद्वितीयत्वं न निश्चितं स्यात् । सृष्ट्यादिप्रतिपादने च ब्रह्मणः प्रपञ्चोपादानत्वनिश्चयादुपादानादन्यत्र कार्यस्य सत्त्वप्रसक्तेरभावाच्च तत्रापि नेति नेतीति प्रपञ्चनिषेधे सति तस्य मिथ्यात्वावगमादद्वैतमतिदृढं भवतीति । उपासनाकाण्डस्थसगुणवाक्यानां तदुपयोगिगुणारोपे निर्गुणस्थानां तेषां निषेधोपयोगिगुणबोधमात्रे तात्पर्यमिति न कस्यापि वचनस्याद्वैतप्रतिपादकवाक्येन विरोधः ॥

तत्पदार्थे ईश्वरो मायाप्रतिबिम्बः, अन्तःकरणप्रतिबिम्बा जीवा इत्येकः पक्षः । तत्र 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वर' इति श्रुतिर्मानम् । अस्मिन् पक्षे जलाशयगतशरावगतसूर्यादिप्रतिबिम्बयोरिव जीवपरयोर्भेदः । उपाधेः प्रतिबिम्बपक्षपातितयोपाधिकृतदोषा ईश्वरेऽपि प्रसज्येरन्नित्यतः परमेश्वरो बिम्बभूतः, प्रतिबिम्बभूता जीवाः, बिम्बत्वप्रतिबिम्बत्वाभ्यामस्पृष्टं शुद्धं ब्रह्मेत्यपरं मतम् । बिम्बभूतमुखादेर्दर्पणादिप्रवेशाभाववदीश्वरस्यान्तःकरणाद्युपाध्यप्रवेशे तस्य सर्वान्तर्यामित्वं कथमिति नाशङ्कनीयम् । परिच्छिन्नबिम्बस्य उपाधिप्रदेशेऽभावेऽपि अपरिच्छिन्नबिम्बस्येश्वरस्य प्रतिबिम्बप्रदेशसंबन्धस्याबाधितत्वान्न तस्य सर्वान्तर्यामित्वस्य भङ्गः ॥

त्वंपदार्थश्चैकजीववादेऽविद्याप्रतिबिम्बितो जीवः, अनेके जीवा इति पक्षे अन्तःकरणप्रतिबिम्बितः । जीवस्य च जाग्रत्स्वप्नसुषुप्तय इति तिस्रोऽवस्थाः सन्ति । तत्रेन्द्रियजन्यज्ञानं यद्दशायामस्ति सा जाग्रदवस्था । तादृशज्ञानमन्तःकरणवृत्तिः ॥

सा चावरणभङ्गार्थेत्येके । तेषां मते अविद्योपाधिको जीव इति घटाद्यवच्छिन्नचैतन्यस्य जीवस्य चैक्यात्सर्वदा जीवस्य घटादिभानापत्त्या तद्वारणाय तदावारकं किंचिदज्ञानमङ्गीकृतम् । तच्च मूलाज्ञानपरतन्त्रम् । तस्यैवावस्थाज्ञानं तूलाज्ञानमिति वा नाम । एवं च तदज्ञानेनावृतत्वान्न घटादेः सर्वदा भानप्रसङ्गः । अनावृतचैतन्यस्यैव भासकत्वोपगमात् । आवरणभङ्गश्च वृत्त्येत्यवश्यमङ्गीकरणीयम् । आवरणस्य येन केनापि निवृत्त्यनङ्गीकारे घटादेर्भानं कदाऽपि न स्यात् । भासकस्य निवर्तकत्वासंभवान्न चैतन्यमात्रस्य तथात्वम् । सामान्यतो वृत्त्युपहितस्य निवर्तकत्वाङ्गीकारे परोक्षस्थलेऽपि तन्निवृत्तिः प्रसज्येत । तस्मादपरोक्षा वृत्तिस्तादृशवृत्तिविशिष्टचैतन्यं वा आवरणभङ्गहेतुरित्यावरणभङ्गार्था वृत्तिरित्येकं मतम् ॥

संबन्धार्था वृत्तिरिति पक्षान्तरम् । तत्राविद्योपाधिकस्य सर्वव्यापिनो जीवस्य घटादिप्रदेशे विद्यमानस्यापि अपरोक्षवृत्तिविरहदशायां न विषयावभासकत्वं तादृशवृत्तिदशायां विषयावभासकत्वं च दृश्यते इति

व्यङ्ग्यव्यञ्जकभावरूपसंबन्धविशेषस्यैव भाननिर्वाहकत्वस्य कादाचित्कवृत्तेरेव तत्प्रयोजकत्वस्य चाङ्गीकार आवश्यक इति वृत्तेः संबन्धार्थत्वम् । वृत्तेर्विषयावभासकसंबन्धप्रयोजकत्वं कथमिति चेदित्थम् । तैजसमन्तःकरणं स्वत एव स्वच्छत्वात् जीवचैतन्याभिव्यञ्जनसमर्थम् । घटादिकं त्वस्वच्छद्रव्यत्वान्न तथा, किन्तु वृत्तिसंयोगे सति चैतन्याभिव्यञ्जनसमर्थं भवति । उक्तं च विवरणे—'अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयति' इति । स्वच्छद्रव्यसंबन्धादस्वच्छद्रव्यस्य प्रतिबिम्बग्रहणसामर्थ्यमनुभवसिद्धं च, यथा कुड्यादेर्जलादिसंबन्धात् । विषयस्य व्यञ्जकत्वं तत्प्रतिबिम्बग्राहित्वम् । चैतन्यस्य अभिव्यक्तत्वं तु प्रतिबिम्बितत्वामिति मन्तव्यम् । विषयस्योक्ताभिव्यञ्जकत्वसिद्ध्यर्थमेव प्रत्यक्षस्थले वृत्तेरिन्द्रियद्वारा बहिर्निर्गमनाङ्गीकारः । परोक्षस्थले विषये वृत्तिसंयोगाभावेन विषयस्य चैतन्यानभिव्यञ्जकतया न प्रत्यक्षत्वम् । विषयाणां चैतन्याभिव्यञ्जकत्वस्यैव तन्मते प्रत्यक्षत्वात् । जीवानामन्तःकरणोपाधिकतया परिच्छिन्नत्वामिति पक्षेऽपि वृत्तेः संबन्धार्थत्वमेव । तथाहि । जीवस्य परिच्छिन्नतया विषयदेशसंबन्धाभावेन विषयप्रत्यक्षासंभवात् तत्सिद्ध्यर्थं घटाद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदसिद्ध्यर्थं बहिर्वृत्तिरावश्यकीति वृत्तेः संबन्धार्थता । वृत्तिदशायां प्रमातृविषयचैतन्ययोरभेदप्रकारस्तु उपपादितोऽधस्तात् ॥

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था । अविद्यागोचराविद्यावृत्त्यवस्था सुषुप्त्यवस्था ॥

अविद्याप्रतिबिम्बो जीव इत्येकजीववादिमतम् । अन्तःकरणप्रतिबिम्बा इति मते जीवा अनेके । उभयत्रापि जीवः स्वयंप्रकाशोऽनुभवरूपश्च । अत एव स्वप्नावस्थामधिकृत्य 'अत्रायं पुरुषः स्वयंज्योतिः' इति 'प्रज्ञानघन' इति च श्रुतिः । एवंविधो जीवस्त्वंपदार्थः ॥

तत्त्वमसीत्यादिवाक्यानि जीवपरयोरैक्यं वदन्ति । तस्य च नाहमीश्वर इति प्रत्यक्षेण, किंचिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धधर्माश्रयत्वेन, 'द्वा सुपर्णा' इत्यादिश्रुत्या, 'द्वाविमौ पुरुषौ' इत्यादिस्मृत्या च सिद्धार्थविरुद्धत्वेऽपि उपक्रमादिना निर्णीतजीवपराद्वैततात्पर्यकमहावाक्यानां प्रबलतरप्रमाणत्वेन

तेषां गौणार्थकत्वकल्पनं न न्याय्यमिति तेषामैक्यरूपमुख्यार्थपरत्वमेव । अन्यथा चन्द्रादौ ज्योतिश्शास्त्रबोधितस्य प्रकृष्टमहत्परिमाणस्य स्वल्पपरिमाणग्राहिणा प्रत्यक्षेण बाधः प्रसज्येत । भेदवादस्तूपाधिकृतो भ्रान्तिकृतो वेति द्रष्टव्यम् । आरोप्यविषयसंस्कारस्यैवारोपप्रयोजकत्वात् प्रकृते च तादृशसंस्कारस्यानादितया कर्तृत्वाद्यध्यासे न काऽप्यनुपपत्तिरिति ध्येयम् । तत्त्वंपदशक्यविशिष्टार्थयोरभेदासंभवेऽपि तत्पदलक्ष्यार्थयोरैक्यं संभवत्येवेति प्रतिपादितमधस्तात् ॥

इत्थं च सर्वप्रमाणाविरुद्धं—

'आत्मानं चेद्विजानीयादहमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥
जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चो यत्प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धात्प्रमुच्यते ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥
यथा नदी नदो लोके सागरेणैकतामियात् ।
तद्वदात्माऽक्षरेणासौ निष्कलेनैकतामियात् ॥
यदस्थूलमनण्वाख्यमप्रमेयमवर्णकम् ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम् ॥
सर्वभूतान्तरस्थाय नित्यशुद्धचिदात्मने ।
प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः ॥'

इत्यादिश्रुतिपुराणस्मृत्यादितात्पर्यविषयीभूतं निरस्तसमस्तोपाधि जीवब्रह्मैक्यमेव वेदान्तशास्त्रस्य विषय इति सिद्धम् ॥

वेदान्तशास्त्रस्य प्रयोजनं परमपुरुषार्थः । स च मोक्षः । यज्ज्ञातं सत्स्ववृत्तितयेष्यते स पुरुषार्थः । मुख्यामुख्यभेदेन स द्विविधः । तत्र सुखदुःखाभावौ मुख्यौ, तदन्यतरसाधनममुख्यम् । सुखं द्विविधं—निरतिशयं सातिशयं चेति । तत्राद्यं ब्रह्मसुखमेव 'आनन्दो ब्रह्मेति व्यजानात्'

इत्यादिश्रुतेः । द्वितीयं विषयविशेषानुषङ्गजनितान्तःकरणवृत्तिविशेषाधीनं परस्परतारतम्योपेतं आनन्दवल्ल्यां प्रसिद्धमन्तःकरणवृत्तौ ब्रह्मानन्दप्रतिबिम्बरूपम् । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः ॥

दुःखनिवृत्तिसहितब्रह्मानन्दावाप्तिर्मोक्षः । स च तत्त्वज्ञानात् भवति । 'ब्रह्मविद्ब्रह्मैव भवति' 'तरति शोकमात्मवित्' इत्यादिश्रुतेः । तयोः सिद्धत्वेऽपि कण्ठगतस्य विस्मृतस्य मणेः प्राप्तस्यैवाप्तोपदेशात् अप्राप्तस्येव प्राप्तिर्यथा, यथा च मन्दान्धकारे रज्जौ सर्पत्वभ्रमवतो नायं सर्प इत्याप्तवचनात्सर्पनिवृत्त्या परिहृतस्यैव परिहारस्तथा तयोः प्राप्तिपरिहारौ ॥

स च मोक्षस्तत्वज्ञानैकफलम्, 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेः । अज्ञाननिवृत्तेर्ज्ञानमात्रसाध्यत्वादज्ञाननिवृत्तिमन्तरेणाज्ञानकार्यसंसारदुःखस्यानिवृत्तेरिति । तच्च ज्ञानं जीवपरैक्यविषयकम् 'अभयं वै जनक प्राप्तोऽसि, यदात्मानमेवावेदहं ब्रह्मास्मीति' इति श्रुतेः । तच्च ज्ञानं प्रत्यक्षरूपमेव निवर्त्यभ्रमस्य प्रत्यक्षरूपत्वात् परोक्षज्ञानेन तदनिवृत्तेः । तच्चापरोक्षं ज्ञानं तत्त्वमसीति वेदान्तवाक्यादित्येके । अपरे तु—प्रत्यक्षत्वे इन्द्रियजन्यत्वं प्रयोजकम् । नतु विषयविशेषः । अन्यथा करणविशेषाधीने प्रत्यक्षाप्रत्यक्षे कथमुपपद्येते । तेन ब्रह्मसाक्षात्कारे वाक्यं न करणम् । किंतु मननादिसंस्कृतं मन एव । मनसैवानुद्रष्टव्यमिति श्रुतेः । औपनिषदत्वोक्तिरुपनिषत्प्रयोज्यत्वनिबन्धनेति न तद्विरोधः । मनोगोचरत्वश्रुतिरप्यसंस्कृतमनोविषयेति न तस्या अपि विरोध इत्याहुः ॥

ज्ञानापरोक्ष्यं न करणविशेषाधीनम् । इन्द्रियजन्यत्वस्य प्रत्यक्षत्वव्यापकत्वे सुखादिप्रत्यक्षे व्यभिचारः । मनस इन्द्रियत्वाभावेन तादृशप्रत्यक्षे इन्द्रियजन्यत्वस्याभावात् । अतस्तत्त्वमस्यादिवाक्यमेव ब्रह्मापरोक्षकरणम् । प्रत्यक्षस्य करणविशेषानधीनत्वे एकस्मिन्नेव सूक्ष्मवस्तुनि पटुपटुकरणाभ्यां प्रत्यक्षतदभावौ कथमुपपद्येतामिति नाशङ्कनीयम्, प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वस्यैव प्रत्यक्षत्वप्रयोजकतया प्रत्यक्षे चान्तःकरणस्य बहिर्निर्गमनावश्यंभावात् सूक्ष्मवस्तुन्यसमर्थेन्द्रियस्य सन्निकर्षाभावादन्तःकरणस्य बहिर्निर्गमनासंभवादुभयोपपत्तेः ॥

तस्मात्तत्त्वमसीत्यादिवाक्यमेव ब्रह्मात्मैक्यप्रत्यक्षकरणम्। 'तं त्वौपनिषदम्' इत्यादिश्रुतेः । 'मनसैवानुद्रष्टव्यः' 'दृश्यते त्वग्र्यया बुद्ध्या' इत्यादिश्रुतिश्च तस्य सहकारित्वमेव वदतीत्येव सिद्धान्तः ॥

पापक्षयोऽपि ज्ञाने हेतुः । तत्र च शुभं कर्म कारणमिति कर्मणां परम्परया ज्ञाने उपयोगः । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽनाशकेन' इति श्रुतेः । 'कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते' इति स्मृतेश्च । कषायोऽत्र पापम् ॥

एवं श्रवणादिकमपि तत्त्वज्ञाने कारणं, मैत्रेयीब्राह्मणे तथा प्रतिपादनात् । श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया । मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनको मानसो व्यापारः । निदिध्यासनं नामानादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यापादनानुकूलो मानसो व्यापारः । ब्रह्मसाक्षात्कारे निदिध्यासनं मुख्यं कारणम् । 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादिश्रुतेः । निदिध्यासनं प्रति मननं कारणम् । तदभावेऽर्थदार्ढ्यासिद्ध्या निदिध्यासनस्यैवासिद्धेः । एवं मनने श्रवणं हेतुः । तेन विना तात्पर्यनिश्चयासंभवेन शाब्दबोधस्यैवानुदयाद्वेदान्तवाक्यार्थे मानान्तरविरोधशङ्कापरिहारानुकूलतर्कानुसंधानरूपमननासंभवात् । इत्थं च तत्त्वज्ञाने निदिध्यासनं, तत्र मननं, मनने च श्रवणं कारणमिति फलितम् ॥

केचित्तु श्रवणादित्रयमपि ज्ञाने स्वतन्त्रं कारणं, घटादिकं प्रति मृत्कुलालादिवदित्याहुः । अन्ये तु—तत्त्वज्ञाने श्रवणं मुख्यं कारणम् । मनननिदिध्यासने त्वङ्गे । अत्राङ्गमुख्यभावः प्राधान्याप्राधान्यरूपः । घटादिकार्ये मृदादीनां प्राधान्यं दण्डादेश्चाप्राधान्यमितिवदिति वदन्ति ॥

मुमुक्षुः श्रवणादावधिकारी । मुमुक्षायां च नित्यानित्यविवेक इहामुत्रार्थफलभोगविरागः शमदमोपरतितितिक्षासमाधानश्रद्धा उपयुज्यन्ते । अन्तरिन्द्रियनिग्रहः शमः । बहिरिन्द्रियनिग्रहो दमः । विक्षेपाभाव उपरतिः । शीतोष्णादिद्वन्द्वसहिष्णुत्वं तितिक्षा । चित्तैकाग्र्यं समाधानम् । गुरुवेदान्तवाक्यविश्वासः श्रद्धा । अत्रोपरमः संन्यासः । तेन संन्यासिनामेव

श्रवणादावधिकार इति केचित् । उपरमशब्दो न संन्यासे रूढः किंतु विक्षेपविरहार्थकः । तेन गृहस्थादीनामपि तत्राधिकारः । अत एव जनकादेरपि ब्रह्मविचारः श्रुतिप्रसिद्धः संगच्छते । तेन सर्वाश्रमिणामपि श्रवणादावधिकारस्तुल्य इत्यपरे ॥

सगुणोपासनस्य मोक्षे चित्तैकाग्र्यसंपादनद्वारा कारणत्वम् । उक्तं हि—

'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥' इति ।
'वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥' इति ।

सगुणोपासका अर्चिरादिद्वारा ब्रह्मलोकं प्राप्य तत्र श्रवणाद्यनन्तरं ब्रह्मणा सह मुक्ता भवन्ति । काम्यकर्मकृतस्तु धूममार्गेण पितृलोकादिकं गत्वा तत्र कर्मफलस्य भोगेन क्षये कर्मशेषभोगाय पुनरिममेव लोकं प्राप्य विविधयोनिषु स्थावरजङ्गमरूपासु स्वस्वकर्मानुसारेण संसरन्ति । तथाच श्रूयते—'रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणाः कपूयां योनिम्' इति । तत्त्वज्ञानिनस्तु न लोकान्तरगमनं, 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः । ते पुनः प्रारब्धकर्मशेषं भोगेन क्षपयित्वा देहपातानन्तरं विदेहकैवल्यं प्राप्नुवन्ति ॥

'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' इत्यादिश्रुत्या 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति स्मृत्या च संचितकर्मणामेव ज्ञानेन क्षय इति सिद्धान्तः । संचितं कर्म सुकृतं दुष्कृतं चेति द्विविधम् । 'तस्य पुत्रा दायमुपयन्ति, सुहृदः साधुकृत्यां, द्विषन्तः पापकृत्याम्' इति श्रुतेः । प्रारब्धस्य कर्मणोऽज्ञाननिवृत्तौ प्रतिबन्धकत्वात् ज्ञाने सत्यपि यावत्प्रारब्धावस्थानं नाज्ञानस्य नाशः । अविद्याया एकत्वपक्षे तत्त्वज्ञानेन तस्या नाशे सर्वमुक्त्यापत्ताविष्टापत्तिरेव शरणम् । अत एव दोषादविद्याया नानात्वमन्येऽङ्गीकुर्वन्ति । अविद्यैकैव तस्या ब्रह्मस्वरूपावारिकाः शक्तयो नाना । एकस्य ज्ञाने सति तस्य ब्रह्मावारकशक्तेर्नाशात्तद्विशिष्टाविद्यानाशात्तस्य मोक्षेऽपि अन्येषां तादृशशक्तेरनाशान्न तेषां मोक्ष इति नैकमुक्तौ

सर्वमुक्तिप्रसङ्ग इत्यपरे । एकमुक्तौ सर्वमुक्तिरिति पक्षो न स्वरसः । बहूनां मुक्त्यनन्तरमपि लोकयात्रायाः पुराणादिषु प्रसिद्धत्वात् ॥

इत्थं च ब्रह्मज्ञानं मोक्षसाधनम् । स च मोक्षोऽनर्थनिवृत्तिसहिताखण्डनित्यनिरतिशयानन्दावाप्तिरूपो वेदान्तशास्त्रस्य प्रयोजनमिति सिद्धम् । इति शिवम् ॥

प्रसादादेव भवतो निश्चित्याहं भवानिति ।
सर्वमेतज्जगदपि न बिभेमि कुतश्चन ॥

॥ इति श्रीरामवर्माख्यगोश्रीमहाराजर्षिकृतः
वेदान्तपरिभाषासंग्रहः समाप्तः ॥